# PIPPALI - पिप्पली

**पिप्पली मागधी कृष्णा वैदेही चपला कणा ।**
**उपकपल्योषणा शौण्डी कोलास्यात्तीक्ष्णतण्डूला ।। (Bpn)**

Synonyms of pippali are magadhi, krsna, vaidehi, capala, kana, upakulya, usana, saundi, kola, tiksna tandula.

**पिप्पली कृकरा शौण्डी चपला मागधी कणा ।**
**कटुबीजा च कोरङ्गी वैदेही तिक्ततण्डुला ।।**
**श्यामा दन्तफला कृष्णा कोला च मगदोद्भवा ।**
**ऊषणा चोपकुल्या च स्मृत्याह्वा तीक्ष्णतण्डुला ।। (Rjn)**

Synonyms of pippali are krkara, saundi, capala, magadhi, kana, katubija, korangi, vaidehi, tiktatandula, syama, dantaphala, krsna, kola, magadodbhava, usana, upakulya, smrtyahva, tiksna tandula.

**श्लेष्मला स्वादुशीताऽद्रा गुर्वी स्निग्धा च पिप्पली ।**

**सा शुष्का विपरीताऽतः स्निग्धा वृष्या रसे कटुः ।।**
**स्वादुपाकानिलश्लेष्मश्वासकासापहा सरा ।**
**न तामत्युपयुञ्जीत रसायनविधिं विना ।। (Mdn)**

Ardra pippali is svadu in rasa, guru, snigdha in guna, sita in veerya and increases slesma.

Suska pippali has opposite properties, katu in rasa, snigdha in guna, vrsya, svadu in paka, alleviates anila, slesma, kasa, and svasa. It should not be used in excess except in the form of rasayana vidhi.

**पिप्पली दीपनी वृष्या स्वादुपाका रसाय-ी ।**

अनुष्णा कटुका स्निग्धा वातश्लेष्महरी लघुः ॥
पिप्पली रेचनी हन्ति श्वासकासोदरज्वरान् ।
कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान् ॥

आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः ।
पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपनी ॥

पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी ।
श्वासकासज्वरहरी वृष्णा मेध्याग्निवर्द्धनी ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णरुचिश्वासहृत्पाण्डुकृमिरोगनुत् ॥
द्विगुणः पिप्पलीचूर्णद् गुडाऽऽत्र भिषजां मतः । (Bpn)

Pippali is Dipani, Vrsya, Svadu in Paka, Rasayani, Anusna, Katu in rasa, Snigdha, Vata slesma hara, Laghu, Recani cures Svasa, Kasa, Udara, Jvara, Kustha, Prameha, Gulma, Arsa, Pliha, Sula, Ama, Maruta.

Ardra pippali is Kapha prada, Snigdha, Sita in virya, Madhura in rasa, Guru, and Pitta hara.

Pakva is Pitta prakopani.

Pippali along with Madhu is Meda Kapha vinasini, Svasa-Kasa-Jvara hara, Vrsya, Medhya, Agni vardhana. Cures Jirna jvara Agni mandya. When taken with Guda in two parts to that of Pippali it cures Kasa, Ajirna, Aruci, Svasa, Hrt roga, Pandu roga, Krmi.

पिप्पली कटुका स्वादुर्हिमा त्रिदोषजित् ।
तृड्ज्वरोदरजन्त्वामनाशिनी च रसायनी ॥ (Dhn)

Pippali is Katu,  Svadu in Rasa, Hima in Potency, Snigdha in Guna, Tridosha hara, cures Trt, Jvara, Udara, Jantu, Ama and is Rasayana.

पिप्पली ज्वरहा वृष्या स्निग्धोष्णा कटुतिक्तका ।
दीपनी मारुतश्वासकासश्लेष्मक्षयापहा ।। (Rjn)

Pippali is Jvara hara, Vrsya, Snigdha, Usna in Potency, Katu and Tikta in Rasa, Dipani, cures Maruta, Svasa, Kasa, Slesma, Ksaya.

पिप्पल्यार्द्रा हिमा जुर्वी स्वाद्वी स्निज्धा कफप्रदा ।

शुष्का लघुः स्वादुपाका स्निग्धानुष्णा रसे कटुः ।।
कफवातहरा रुच्या सरा वृष्या रसायनी ।
दीपनी पाचनी हृद्या पित्तला श्वासकासनुत् ।।
निहन्ति कफगुल्मार्शोमेहप्लीहज्वरोदरान् ।

तीक्ष्णोष्णभावात् श्लेष्मघ्नी तस्माच्चैवाग्निदीपनी ।।
शैत्यप्रसादमाधुर्यात् पित्तं हन्ति च पिप्पली ।
औष्ण्यात् सरत्वात् पाकाच्च वातस्याप्यनुलोमनी ।। (Kdn)

Ardra pippali is Hima, Guru, Svadu, Snigdha, Kapha prada.

Suska is Laghu, Svadu in Paka, Snigdha, Anusna, Katu in Rasa, Kapha Vata hara, Rucya,Sara, Vrsya, Rasayani, Dipani, Pacani, Hrdya, Pittala, Svasa kasa hara, cures Kapha, Gulma, Arsa, Meha, Pliha, Jvara, Udara.

Since it is Tiksna, Usna, it is Slesma ghna and Agni dipana. Since it is Sita and madhura it is Pittaghna. Since it is Usna, Sara and Paka it is Vata anulomana kara.

पिप्पलीमूलं ग्रन्थिकमुक्तं चटिकाशिंरः कटुग्रन्थिः ।
सस्यग्रन्थिज मूषजसंज्ञं ग्रन्थिविरुपकश्चेति ।। (Aa . ma)

Pippali mula, Granthikamukta, Catikasira, Katugranthi, Sasyagranthi, Usana, Granthivirupaka are the synonyms of Pippali mula.

**ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः । (Bpn)**

Granthika,and Catakasira are the synonyms of Pippali mula.

**ग्रन्थिकं पिप्पलीमूलं मूलं तु चविकाशिरः ।**
**कोलमूलं कटुग्रन्थि कटुमूलं कटूषणम् ।।**
**सर्वग्रन्थि च पत्राढ्यं विरूपं शोणसम्भवम् ।**
**सुग्रन्थि ग्रन्थिलं चैव पर्यायाः स्याश्चतुर्दश ।। (Rjn)**

Pippali mula is also named as Granthika, Pippalimula, Mula, Cavikasira, Kolamula, Katugranthi, Katumula, Katusna, sarvagranthi, Patradhya, Virupa, Sona sambhava, Sugranthi, Granthila.

**दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु ।**
**रूक्षं पित्तकरं भेदि कफवातोदरापहम् ।।**
**आनाहप्लीहगुल्मघ्नं कृमिश्वासकफापहम् । (Bpn)**

Pippali mula is Dipana, Katu in rasa, Usna in Potency, Pacana, Laghu in Guna, Ruksa, Pittakara, Bhedi, Kapha-Vatodara hara, Anaha-Pliha-Gulmaghna, Krmi-Svasa-Kapha hara.

**गुल्मप्लीहोदरा**नाहशम**नं शूलनाशनम् ।**
**उष्णवीर्यं वमिहरं मूलं पिप्पलिसंभवम् ।। (Mdn)**

Pippali mula cures Gulma, Pliha rogas, Udara, Anaha, Sula, Vami and it is Usna in Potency.

कटूष्णं पिप्पलीमूलं श्लेष्मसंघातनाशनम् ।
वातोच्छित्तिकरं हन्ति कृमीन्वह्निप्रदीप्तिकृत् ॥ (Dhn)

Pippali Mula is Katu in Rasa, Usna in Potency, Slesma-Snghta nasana, Vatocchittikara, cures Krmi, and is Vahni pradipti kara.

कटूष्णं पिप्पलीमूलं श्लेष्मकृमिविनाशनम् ।
दीपनं वातरोगघ्नं रोचनं पित्तकोपनम् ॥ (Rjn)

Pippali mula is Katu in Rasa, Usna in Potency, Slesma-Krmi Vinasana, Dipana, Vatarogaghna, Rocana, Pitta kopana.

भेदनं पिप्पलीमूलं कासामशूलनाशनम् ।
पित्तप्रकोपि तीक्ष्णोष्णं रूक्षं पाचनरोचनम् ॥ (Rav)

Pippali mula is Bhedana, Kasa-Ama-Sula nasana, Pitta prakopi, Tiksna, Usna in Virya, Ruksa, Pacana and Rocana.

पिप्पलीमूलं दीपनीयपाचनीयानाहप्रशमनानां । (C.S)

Pippali mula is Dipaniya, Pacaniya, Anaha prasamana.

पिप्पलीभिः श्रृतं तोयमनभिष्यन्दि दीपनम् ।
वातश्लेष्मविकारघ्नं प्लीहज्वरविनाशनम् ॥ (C.D)

Pippali sruta is useful in Abhishyanda, Dipana, Vata slesma vikaraghna, Pliha jvara vinasana.

पिप्पली मधुसंयुक्ता चाम्लपित्तविनाशिनी ॥ (C.D)

Pippali taken along with Madhu is Amlapitta vinasaka.

कासाजीर्णरुचिश्वासहृत्पाण्डुकृमिरोगनुत् ।
जीर्णज्वरेऽग्निसादे च शस्यते गुडपिप्पली ॥

पिप्पलीलोहचूर्णं वा पयसा प्लीहनाशनम् ॥

पिप्पलीवर्द्धमानं वा गण्डमालासु योजयेत् (Sodala)

Gudapippali cures Kasa, Ajirna, Aruci, Svasa, Pandu, krmi, Jirna jvara, Agni sada.

Pippali with Loha curna or Payas cures Pliha roga.

Pippali Vardhamana rasayana is used in Ganda mala.

पिप्पली पिप्पलीमूलं भल्लातकफलानि च ।
एतत्कल्कश्च सक्षौद्र ऊरुस्तंभनिवारणः ॥ (S.S)

Pippali, Pippalimula and Bhallataka kalka taken along with Ksaudra is Urustambha nasa.